MIDNAPORE CITY COLLEGE
ESTD 2017
CENTRAL LIBRARY



B.A./3rd Sem (H)/SNSK/23(CBCS)

# 2023

## 3rd Semester Examination

## SANSKRIT (Honours)

### Paper : C 7-T

### [Indian Social Institutions and Polity]

[CBCS]

Full Marks : 60 — Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. अधोनिर्दिष्टेषु प्रश्नेषु संस्कृतभाषया देवनागरीलिप्या च पूर्णवाक्येन दशप्रश्नाः समाधेयाः — 2×10=20

(क) भगवतो मनोर्मते कानि दशविधधर्मलक्षणानि ?

(ख) 'इन्द्रियनिग्रहः' इति कथनेन किमवगम्यते ?

(ग) 'स्त्रियो यत्र च पूज्यन्ते रमन्ते तत्र देवता' — अत्र को वक्ता ? कः श्रोता ? का पूजनीया ? किञ्च ग्रन्थस्थानम् ?

(घ) धर्मशास्त्रेषु प्राधान्येन के त्रयः विषयाः प्रतिपादिताः सन्ति ?

(ङ) क्या रीत्या कः चतुर्वर्णमसृजत् ?

(च) शोभनाचरणेन जातेःउन्नतिर्भवति न वा ? भवति चेत्, बौधायनमाश्रित्य उत्तरं दीयताम्।

P.T.O.

MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY



(छ) कः स्त्रीषु सर्वभक्षित्वशक्तिमददत्? स्त्रियः कर्हिचित् दुष्यन्ति न वा?

(ज) मनुसंहितानुसारतः परमेश्वरः केनोपादानेन नृपमसृजत्?

(झ) गौतमस्य मते कतिविधः संस्कारः? विषयेऽस्मिन् व्यासस्य किं मतम्?

(ञ) पार्ष्णिग्राहः कः?

(ट) उपायः कतिविधः? के च ते?

(ठ) 'विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशात् — वाक्यमिदं कुत्र वर्तते? अत्र विशशब्दः कस्मिन् अर्थे प्रयुक्तः?

(ड) 'राजसूय' इति शब्दस्य कोऽर्थः? राजसूययज्ञेन किं क्रियते?

(ढ) शाक्यगणराज्यस्य राजधानी कुत्रासीत्? तस्मिन् गणराज्ये कोऽजायत?

(ण) कौ कामन्दकीयनीतिसार-शुक्रनीतिसारग्रन्थयोः प्रणेतारौ?

2. अधोलिखितेषु निर्देशानुरूपं **चत्वारः** प्रश्नाः समाधेयाः, येषु ***एकस्य*** प्रश्नस्योत्तरं अवश्यमेव संस्कृतभाषया देवनागरीलिप्या च प्रदेयम् : 5×4=20

(क) यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः॥

प्रसङ्गोल्लेखपूर्वकं व्याख्यायताम्।



(ख) महाभारतस्य शान्तिपर्व अवलम्बने अनार्यजातिसृष्टेः कारणानि समासेन आलोच्यन्ताम्।

(ग) समितिः — टीका कार्या।

(घ) टीका लेख्या — पुरुषार्थः।

(ङ) शतपथब्राह्मणानुसारं रत्निनां स्वरूपं विचार्यताम्।

(च) गृहस्थाश्रमस्य गुरुत्वमालोच्यताम्।

3. अधस्तनेषु प्रश्नेषु **द्वौ** प्रश्नौ समाधेयौ — 10×2=20

(क) वेदकालीनसमाजमाश्रित्य प्रबन्ध एको विरच्यताम्।

(ख) गान्धीगीतामनुसृत्य महात्मगान्धिनः सत्याग्रहस्य स्वरूपं प्रासङ्गिकता च प्रतिपाद्यताम्।

(ग) कौटिल्यदृष्ट्या राष्ट्रपरिचालने षाड्गुण्यस्य प्रयोजनीयता प्रतिपादनीया।

(घ) शुक्रनीतिसारस्य परिचयो दीयताम्।

MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY